ज्वालाहतोऽज्वलत्। दुश्च्यावश्च्यावनो जेता हन्ता ब्रह्मद्विषां हरः। नित्यं त्राता च हन्ता च धर्माधर्माश्रितान्नरान्। प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः। विभाति भगवान् स्थाणुस्तैरेवात्मगुणैर्युतः तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत्। जङ्गमाजङ्गमं राजन्! शुशुभेऽद्भुतदर्शनम्। दृष्ट्वा तन्तु रथं युक्तं कवची स शरासनी। बाणमादाय तं दिव्यं सोमविष्ण्वग्निसम्भवम्। तस्य राजंस्तदा देवाः कल्पयाञ्चक्रिरे प्रभोः। पुण्यगन्धवहं राजन्! श्वसनं देवसत्तमम्। तमास्थाय महादेवस्त्रासयन् दैवतान्यपि। आरुरोह तदा यत्तः कम्पयन्निव मेदिनीम्। तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः। गन्धर्वा देवसंघाश्च तथैवाप्सरसाङ्गणाः। ब्रह्मर्षिभिः स्तूयमानो वन्द्यमानश्च वन्दिभिः। तथैवाप्सरसांवृन्दैर्नृत्यद्भिर्नृत्यकोविदैः। स शोभमानो वरदः खड्गी बाणी शरासनी। हसन्निवाब्रवीद्देवान् सारथिः को भविष्यति। तमब्रुवन् देवगणा यं भवान् संनियोक्ष्यते। स भविष्यति देवेश! सारथिस्ते न संशयः। तानब्रवीत् पुनर्देवो मत्तः श्रेष्ठतरो हि यः। तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य मा चिरम्। एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना। गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन्। यथा तत् कथिता देव! त्रिदशारिविनिग्रहे। तथा च कृतमस्माभिः प्रसन्नो नो वृषध्वजः। रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः। सारथिञ्च न जानीमः कः स्यात्तस्मिन् रथोत्तमे। तस्माद्विधीयतां कश्चित् सारथिर्देवसत्तम!। सफलां तां गिरं देव! कर्त्तुमर्हसि। नो विभो! एवमस्मासु हि पुरा भगवन्नुक्तवानसि। हितं कर्त्ताऽस्मि भवतामिति तत् कर्त्तुमर्हसि। स देवयुक्तो रथसत्तमो नो दुराधरो द्रावणः शात्रवाणाम्। पिनाकपाणिर्विहितोऽत्र योद्धा विभीषयन् दानवानुद्यतोऽसौ। तथैव वेदाश्चतुरो हयाग्र्या धरा सशैला च रथो महात्मनः। नक्षत्रवंशानुगतो वरूथी हरो हि योद्धा सारथिर्नाभिलक्ष्यः। तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान्। तत्प्रतिष्ठो रथो देव! हरो योद्धा तथैव च। कवचानि सशस्त्राणि कार्मुकञ्च पितामह!। त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्। त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो!। स रथं तूर्णमारुह्य संयच्छ परमान् हयान्। जयाय त्रिदशेशानां बधाय त्रिदशद्विषाम्। इति ते शिरसा नत्वा त्रिलोकेशं पितामहम्। देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम्"। पितामह उवाच। "नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः। संयच्छामि हयानेष युध्यतो वै कपर्दिनः"।

इत्युपक्रमे "तान् सोऽसुरगणान् दग्ध्वा प्राक्षिपत् पश्चिमार्णवे। एवन्तु त्रिपुरं दग्धं दानवाश्चाप्यशेषतः। महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा" भा० क० ३४ अ०। भा० द्रो० २०० अ० किञ्चिदन्यथोक्तं यथा

"गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः। पृथ्वीं ससागरवनां रथं कृत्वा तु शङ्करः। अक्षं कृत्वा तु नागेन्द्रं शेषं नाम त्रिलोचनः। चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक्। अणी कृत्वैलपत्रञ्च पुष्पदन्तञ्च त्र्यम्बकः। युगं कृत्वा तु मलयमवनाहञ्च तक्षकम्। योक्त्राङ्गानि च सत्त्वानि कृत्वा शर्वः प्रतापवान्। वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान्महेश्वरः। उपवेदान् खलीनांश्च कृत्वा लोकत्रयेश्वरः। गायत्रीं प्रग्रहं कृत्वा सावित्रीञ्च महेश्वरः। कृत्वोङ्कारं प्रतोदञ्च ब्रह्माणञ्चैव सारथिम्। गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम्। विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च। वायुं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम्। विद्युत् कृत्वाथ निर्घ्याणं मेरुं कृत्वाथ वै ध्वजम्। आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः। त्रिपुरस्य बधार्थाय स्थाणुः प्रहरतां वरः। असुराणामन्तककरः श्रीमानतुलविक्रमः। स्तूयमानः सुरैः पार्थ! ऋषिभिश्च तपोधनैः। स्थानं महेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः। अतिष्ठत् स्थाणुभूतः स सहस्रं परिवत्सरान्। यदा त्रीणि समेतानि अन्तरीक्षे पुराणि च। त्रिपर्वणा त्रिशल्येन तदा तानि बिभेद सः। पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम्। शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम्। पुराणि दग्धवन्तं तं देवा याता प्रवीक्षितुम्"।

त्रिपुरदहनादयोऽप्यत्र।

**त्रिपुरभैरवी** स्त्री त्रिपुरा भैरवी कर्म्म०। त्रिपुराख्यदेवीभेदे "आद्यं त्रिपुरभैरव्याः वीजमाद्यं प्रकीर्त्तितम्" इति "चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम्" इति च तन्त्रसा०

**त्रिपुरमल्लिका** स्त्री त्रीणि पुराणीव पुष्पाणि यस्याः कर्म०। त्रिपुरमालिकापुष्पवृक्षभेदे त्रिका०।